कृत्वेतत् सर्व्वमानन्दादात्री दैत्यपतेर्बलेः ।
पूजां कृत्वा ततः पश्चात् सम्यग्द्यूतं समारभेत् ॥"

इति पाद्मे उत्तरखण्डे कार्त्तिकमाहात्म्ये १२४ अध्यायः ॥

मार्गशिरः, पुं, (मृगशिरानक्षत्रयुक्ता पौर्ण-मास्यत्र । मृगशिरा + अण् ।) मार्गशीर्ष-मासः । इति शब्दरत्नावली ॥ (यथा, भाग-वते । ६ । १९ । २ ।
"शुक्ले मार्गशिरे पक्षे योषिद्भर्त्तुरनुज्ञया ।
आरभेत व्रतमिदं सार्व्वकामिकमादितः ॥")

मार्गशीर्षः, पुं, (मार्गशीर्षी + अण् ।) अग्र-हायणमासः । मृगशीर्षेण युक्ता पौर्णमासी मार्गशीर्षी साऽस्मिन् मासे भवति मार्गशीर्षः स्यात् । इत्यमरटीकायां भरतः ॥ तत्पर्य्यायः । सहाः २ मार्गः ३ आग्रहायणिकः ४ । इत्य-मरः । १ । ४ । १४ ॥ मार्गशिरः ५ सहः ६ । इति शब्दरत्नावली ॥ वृश्चिकस्थरविप्रारब्ध-शुक्लप्रतिपदादिदर्शान्तोऽयं मुख्यचान्द्रः । एता-दृशमुख्यचान्द्रमासीयपौर्णमास्यन्तः अयं गौण-चान्द्रः । वृश्चिकराशिरविकोऽयं सौरः । इति स्मृतिः ॥ * ॥ तत्र जातफलम् ।
"यस्य प्रसूतिः खलु मार्गमासे
तीर्थे प्रवासे सततं मतिः स्यात् ।
परोपकारी व्रतसाधुवृत्तिः
सदृश्यतियुक्तो ललनाभिलाषी ॥"
इति कोष्ठीप्रदीपः ॥ * ॥
(तथास्य विषयः ॥ कार्त्तिकमार्गशीर्षौ शरत् । इति सुश्रुते सूत्रस्थाने षष्ठेऽध्याये ॥)

अथ मार्गशीर्षकृत्यम् ।

आश्विनशुक्लपक्षे नवान्नश्राद्धाकरणे मार्ग-शीर्षस्य विंशतिदण्डाधिकत्रयोविंशतिदिनाभ्य-न्तरे शुक्लपक्षे तत् श्राद्धं कर्त्तव्यम् । तत्र मार्ग-शीर्षस्य विंशतिदण्डाधिकप्रथमदिनत्रयेतरेषु कृष्णशनिशुक्रवारेतरेषु नन्दारिक्तात्रयोदशीतर-तिथिषु जन्माष्टमचन्द्रजन्मतिथिजन्मनक्षत्रत्रय-पञ्चमताराभ्रयेतरेषु पूर्व्वात्रयमघाभरण्यश्लेषा-र्द्रेतरेषु नक्षत्रेषु श्राद्धं तच्छेषभोजनञ्च कुर्य्यात् । श्राद्धानधिकारिणा तु प्रागुक्तकाले देवादिभ्यो नवान्नं दत्त्वा भोक्तव्यम् । किन्तु अश्लेषाकृत्तिका-ज्येष्ठामूलापूर्व्वभाद्रपदरूपेषु अपि नवान्नभोजनं न कर्त्तव्यम् । चन्द्रताराद्यशुद्धौ प्रतीकारमाह देवलः ।
"कर्म्म कुर्य्यात् फलावाप्त्यै चन्द्रादिशोभने बुधः ।
सुस्थकाले त्विदं सर्व्वं मार्त्तः कालमपेक्षते ॥
चन्द्रे च शङ्खं लवणञ्च तारे
तिथावभद्रे सिततण्डुलांश्च ।
धान्यञ्च दद्यात् करणर्क्षवारे
योगे तिलान् हेममयञ्च लग्ने ॥"
राजमार्त्तण्डे ताराभेदाल्लवणपरिमाणमाह ।
"एकत्रिपञ्चसप्त च द्विजाय दद्यात् पलानि लवणस्य ।
क्रमशो जन्मविपत्प्रत्यरिमरणाख्यताराशु ।

पलन्तु लौकिकैर्मानैः साष्टरक्तिद्विमाषकम् ।
तोलकत्रितयं ज्ञेयं ज्योतिर्ज्ञैः स्मृतिसम्मतम् ॥
तत एवं दध्याज्यसंयुक्तं नवं विप्राभिमन्त्रितम् ।
मन्त्रानादेशे गायत्रीति गायत्र्याभिमन्त्रितम् ॥
नवमन्नं ब्राह्मणानुज्ञां गृहीत्वा प्राश्नीयात् ।
नूतनधान्यासम्भवे पुरातनेनापि श्राद्धं कर्त्तव्यम् ।
वृश्चिके शुक्लपक्षे तदकरणे हरिशयनात् पूर्व्वं मीनधनुःस्थरवीतरत्र माघादौ कर्त्तव्यम् ॥ * ॥ वृश्चिकस्थरवौ शुक्लचतुर्द्दश्यां सौभाग्यकामः पाषाणाकारपिष्टकैर्देवीं पूजयेत् तदपि भक्षये-न्नक्तम् ॥ * ॥ अग्रहायण्यां पौर्णमास्यां पार्व्वण-विधिना श्राद्धमावश्यकम् ॥ * ॥ भविष्यपुराणे ।
"रोहिण्या प्रतिपद्युक्ता मार्गे मासि सितेतरा ।
गङ्गायां यदि लभ्येत सूर्य्यग्रहशतैः समा ॥"
इति कृत्यतत्त्वम् ॥
(स्त्रियां आग्रहायणी पूर्णिमा । यथा, महा-भारते । ३ । ८३ । २६ ।
"मार्गशीर्ष्यामतीतायां पुष्येण प्रययुस्ततः ॥")

मार्गिकः, त्रि, (मृगान् हन्तीति । मृग + "पक्षि-मत्स्यमृगान् हन्ति ।" ४ । ४ । ३५ । इति ठक् ।) मृगहन्ता । (मार्गो गम्यत्वेनास्त्यस्य । ठन् ।) पथिकः । इति सिद्धान्तकौमुदी ॥

मार्गितं, त्रि, (मार्ग अन्वेषणे + क्तः ।) अन्वे-षितम् । इत्यमरः । ३ । १ । १०५ ॥

मार्ग्यं, त्रि, (मृज्यते इति । मृज् + "मृजे-र्विभाषा ।" ३ । १ । ११३ । इति पक्षे ण्यत् । वृद्धिश्च । "चजोः कु घिण्ण्यतोः ।" ७ । ३ । ५२ । इति कुत्वम् ।) मार्ज्जनीयम् । इति सिद्धान्त-कौमुदी ॥ (यथा, भट्टिकाव्ये । ६ । ५६ ।
"मन्युस्तस्य त्वया मार्ग्यो मृज्यः शोकश्च तेन ते ।")
अन्वेषणीयश्च ॥

मार्ज्ज क मार्ज्जने । ध्वनौ । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) क मार्ज्जयति । इति दुर्गादासः ॥

मार्ज्जः, पुं, (मार्ज्जयति पापमलं प्रक्षाल्य उद्धरति जनानिति । मार्ज्ज + णिच् + अच् ।) विष्णुः । इति हेमचन्द्रः । २ । ४४ ॥ (मार्ज्जयति वसन-मलमिति । मार्ज्ज् + अच् ।) रजकः । इति शब्दमाला ॥ मार्जनम् । इत्यमरटीकायां भरतः ॥

मार्ज्जनं, क्ली, (मार्ज्ज्यते इति । मार्ज्ज् + भावे ल्युट् ।) प्रोञ्छनादिना अङ्गनिर्म्मलीकरणम् । माजा इति भाषा । तत्पर्य्यायः । मार्ष्टिः २ मार्ष्टी ३ मार्ज्जना ४ मृजा ५ । इति शब्द-रत्नावली ॥ मार्ज्जः ६ मार्ज्जा ७ । इत्यमर-टीकायां भरतः ॥ (यथा, श्रीमद्भागवते । ९ । ४ । १८ ।
"स वै मनः कृष्णपदारविन्दयो-
र्वचांसि वैकुण्ठगुणानुवर्णने ।
करौ हरेर्मन्दिरमार्ज्जनादिषु
श्रुतिं चकाराच्युतसत्कथोदये ॥")

स्नानकाले शरीरमार्ज्जनगुणाः ।
"दौर्गन्ध्यं गौरवं कण्डूं कच्छुं मलमरोचकम् ।
स्वेदं वीभत्सतां हन्ति शरीरपरिमार्ज्जनम् ॥"
इति राजवल्लभः ॥

देवीगृहमार्ज्जनफलं यथा,—
"देव्या गृहन्तु यः शुक्र ! संमार्ज्जयति नित्यशः ।
स भवेद्बलवान् सौख्यसर्व्वसम्पत्तिसंयुतः ॥
देव्या गृहन्तु यः शुक्र ! गोमयेनानुलेपयेत् ।
स्त्रियो वा यदि वा पुंसः षण्मासन्तु निरन्तरम् ।
स लभेदीप्सितान् कामान् देव्या लोकञ्च गच्छति ॥"
इति देवीपुराणे ४२ अध्यायः ॥

अथ भगवन्मन्दिरमार्जनमाहात्म्यम् ।
"नरसिंहगृहे नित्यं यः संमार्जनमाचरेत् ।
समस्तपापनिर्मुक्तो विष्णुलोके स मोदते ॥"
इति नृसिंहपुराणम् ॥
"संमार्जनन्तु यः कुर्य्यात् पुरुषः केशवालये ।
रजस्तमोभ्यां निर्मुक्तः स भवेन्नात्र संशयः ॥
पांशूनां यावतां राजन् ! कुर्य्यात् संमार्जनं नरः ।
तावन्त्यब्दानि स सुखी नाकमासाद्य मोदते ॥"
इति विष्णुधर्म्मोत्तरम् ॥
"यावत्कानि प्रवाहाणि भूमिसंमार्जने ददुः ।
तावद्वर्षसहस्राणि शाकद्वीपे महीयते ॥
जायते मम भक्तश्च सर्व्वधर्म्मसमन्वितः ।
शुचिर्भागवतः शुद्धो ह्यपराधविवर्जितः ॥
ततो भुक्त्वा सर्व्वभोगान् तीर्त्वा संसारसागरम् ।
शाकद्वीपात् परिभ्रष्टः स्वर्गलोकं स गच्छति ॥
नन्दनं वनमाश्रित्य मोदते चाप्सरैः सह ।
नन्दनाच्च परिभ्रष्टो मम कर्म्मव्यवस्थितः ।
सर्व्वसङ्गान् परित्यज्य मम लोकन्तु गच्छति ॥"
इति वराहपुराणम् ॥ * ॥

स्नानविशेषः । यथा । आतुराणान्तु ।
"अशिरस्कं भवेत् स्नानं स्नानाशक्तौ तु कर्म्मिणाम् ।
आर्द्रेण वाससा वापि मार्ज्जनं दैहिकं विदुः ॥"
इति जाबालवचनाच्छिरो विहाय गात्रप्रक्षा-लनं तदशक्तौ सर्व्वगात्रमार्ज्जनं आर्द्रेण वाससा कुर्य्यात् । इत्याह्निकाचारतत्त्वम् ॥ * ॥ वैदिक-सन्ध्योपासनान्तर्गतमार्जनं यथा । छन्दोगपरि-शिष्टम् ।
"शिरसो मार्जनं कुर्य्यात् कुशैः सोदक-बिन्दुभिः ।
प्रणवो भूर्भुवः स्वश्च गायत्री च तृतीयिका ॥
अब्दैवत्यं तृचश्चैव चतुर्थमिति मार्जनम् ॥"
ओङ्कारो भूरादिव्याहृतित्रयं तृतीया च गायत्री चतुर्थमापोहिष्ठेति ऋक्त्रयम् । इतीदं मार्जनं मार्जनक्रियाकरणमित्यर्थः । रामायणम् ।
"ऋगन्ते मार्जनं कुर्य्यात् पादान्ते वा समाहितः ।
आपोहिष्ठेत्यृचा कार्य्यं मार्जनन्तु कुशोदकैः ॥
प्रतिप्रणवसंयुक्तं क्षिपेन्मूर्द्ध्नि पदे पदे ।
तृचस्यान्तेऽथवा कुर्य्याद्दशीयां मतमीदृशम् ॥